**B.A. 3rd Semester (Honours) Examination, 2020-21**

**Subject: Sanskrit**

**Course ID: 30913** **Course Code: AHSNS-303C-7**

**Course Title: History of Vedic Literature and Theory of Self**

**Full Marks: 40** **Time: 2hrs**

**The figures in the margin indicate full marks.**

**क) अष्टसु पञ्चप्रश्नानाम् उत्तराणि लिखत। एकस्य उत्तरं संस्कृतभाषया देवनागरलिप्या देयम्।** **2x5=10**

१) ऋग्वेदे कति मन्त्राः सन्ति? ऋग्वेदस्य क्रमद्वयं किं किम्?

२) ऋग्वेदे कति मण्डलानि सन्ति? नवममण्डलस्य नाम किम्?

३) कृष्णयजुर्वेदस्य कति शाखाः? तासां नामानि लिखत।

४) ब्राह्मणं नाम किम्? ऋग्वेदस्य ब्राह्मणद्वयस्य नाम लिखत।

५) वेदाङ्गानि कति सन्ति? कानि तानि?

६) आरण्यकं नाम किम्? बृहदारण्यकं कस्मिन् वेदे उपलभ्यते।

७) उपनिषच्छब्दस्य अर्थः कः? कृष्णयजुर्वेदस्य उपनिषदां नामानि लिखत।

८) निरुक्तकारस्य मते कति देवताः? काः च ता भवन्ति?

**ख) द्वयोः संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या।** **5x2=10**

१) "सा होवाच मैत्रेयी येनाहं नामृता स्याम्, किमहं तेन कुर्याम्, यदेव भगवान् वेद तदेव मे ब्रूहीति॥"

२) "स यथा वीणायै वाद्यमानायै न बाह्याञ्शब्दाञ्शक्नुयाद् ग्रहणाय, वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः॥"

३) "यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य नाशास्ति वित्तेनेति॥"

**ग) द्वयोः संस्कृतभाषया देवनागरीलिप्या च व्याख्या कार्या।** **5x2=10**

१) यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः।

अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥

२) अनन्दा नाम ते लोका अन्धेन तमसावृताः।

तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जनाः।।

३) मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।।

४) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।

ततो भूय इव ते तमो य उ विद्यायां रताः।।

**घ) त्रिषु एकस्य प्रश्नस्य उत्तरं संस्कृतभाषया देवनागरीलिप्या लिखत।** **10x1=10**

१) बृहदारण्यकोपनिषदः चतुर्थाध्यायस्य चतुर्थब्राह्मणस्य नाम किम् ? तत्र प्रतिपादितं विषयं वर्णयत।

२) किं नाम संवादसूक्तम् ? ऋग्वेदस्य संवादसूक्तानि आश्रित्य कश्चन लघुनिबन्धो लेख्यः।

२) कानि वेदाङ्गानि सन्ति ? त्रीणि वेदाङ्गानि आश्रित्य लघुनिबन्धो लेख्यः।